# द्वितीयसमाकलनपरीक्षा, 2018-19

## संस्कृतम्

अवधि - होरात्रयम् | कक्षा - सप्तमी | पूर्णांकाः - अशीतिः

विद्यार्थिनः नाम ........................................................................................ वर्गः ....... दिनांकः - 25.9.2018 (मंगलवासरः)

**निर्देशाः -**

- **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
  - ✓ **अपठितावबोधनम् - 05**
  - ✓ **रचनात्मककार्यम् - 20**
  - ✓ **अनुप्रयुक्तव्याकरणम् - 15**
  - ✓ **पठितावबोधनम् - 40**
- **खण्डक्रमानुसारमेव उत्तराणि लेखनीयानि ।**
- **सर्वेषाम् प्रश्नानाम् उत्तराणि केवलं संस्कृतेनैव लेखनीयानि ।**
- **सर्वे प्रश्नाः समाधेयाः ।**

## खण्डः - क (अपठितावबोधनम् - 5 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

अयोध्यायाः शासकः दशरथः आसीत् । तस्य चत्वारः पुत्राः आसन् । ज्येष्ठः पुत्रः श्रीरामः शस्त्रेषु शस्त्रविद्यायाम् च निपुणः आसीत् । तस्य भार्या सीता आसीत् । सा जनकस्य पुत्री आसीत् । दशरथस्य आदेशेन रामः चतुर्दश वर्षाणि वने अवसत् । यदा चतुर्दश वर्षाणाम् पश्चात् ते अयोध्याम् प्रत्यागच्छन् तदा अयोध्यायाः जनाः प्रसन्नाः अभवन् । जनाः स्वगृहान् अभूषयन्। गृहेषु दीपकाः अपि प्रज्वालिताः ।

**I) एकपदेन उत्तरत -** **(½×4=2)**

क) अयोध्यायाः शासकः कः आसीत् ?

ख) शस्त्रेषु कः निपुणः आसीत् ?

ग) जनकस्य पुत्री का आसीत् ?

घ) कस्य आदेशेन श्रीरामः वने अगच्छत् ?

**II) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

क) रामः वने किमर्थम् अगच्छत् ?

ख) जनाः स्वगृहान् कदा अभूषयन् ?

**III) निर्देशानुसारम् उत्तरत -** **(½×2=1)**

क) 'अयोध्यायाः शासकः दशरथः आसीत् ।' अत्र क्रियापदं किम् अस्ति ?

अ) आसीत् ब) शासकः स) दशरथः द) अयोध्यायाः

ख) धातुम् लिखत - ''अभूषयन्। ''

अ) अभू ब) भूष् स) भू द) आभूषण

## खण्डः - ख (रचनात्मककार्यम् - 20 अंकाः)

**प्र.2 अग्रजस्य विवाहार्थम् दिनत्रयस्य अवकाश हेतु प्रधानाचार्यम् प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत ।** (½×10=5)

**मञ्जूषा -** भ्रातुः, अस्ति, धन्यवादः, इदम्, परश्वः, मह्यम्, अनुगृहणन्तु, वरयात्रा, अवकाशं, प्रियशिष्या

सेवायाम्,

श्रीमान् प्रधानाचार्यमहोदयः

ओ. पी. जिंदल विद्यालयः

रायगढ़नगरम् ।

विषयः - दिनत्रयस्य अवकाशार्थम् ।

श्रीमन् !

सेवायाम् (1)............ निवेदनम् (2)............ यत् मम ज्येष्ठस्य (3)............ विवाहः (4)............. भविष्यति । (5).............. तु वाराणसीम् गमिष्यति। अतः (6)............ दिनत्रयस्य (7)............ प्रदाय (8)...........। (9).............. ।

तिथिः 25.09.2018

भवदीया

(10)..............

**प्र.3 अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्येषु चित्रवर्णनम् कुरूत -** (2×5=10)

**मञ्जूषा -** बसस्थानम्, एतत्, जनाः, तिष्ठन्ति, पंक्तिबद्धाः, बसयानाम्, रसम्, बालकः, जनकेन सह, आगच्छति, पिबति, स्वच्छता, अस्ति




**प्र.4 अधोलिखिते वार्तालपे रिक्तस्थानानि मञ्जूषातः पदानि चित्वा पूरयत -** (1×5=5)

**मञ्जूषा -** सह, गच्छामि, क्रेतुम्, गच्छसि, इच्छावः

राकेशः - हे विजय ! त्वम् कुत्र (1).............. ?

विजयः - अहम् तु फलानि क्रेतुम् विपणम् (2)..............।

सुधीरः - तिष्ठ ! आवाम् अपि त्वया (3).............. चलिष्यावः।

विजयः - युवाम् किम् (4).............. इच्छथः ?

राकेशः - आवाम् तु स्वानुजाय एकं क्रीडनकं क्रेतुम् (5)..............।

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 15 अंकाः)

**प्र.5** **अधोलिखितप्रश्नानाम् उत्तराणि उचितं पदं चित्वा लिखत -** **(1×2=2)**

क) 'च' वर्गस्य नासिक्यं वर्णम् किम् अस्ति ?

i) ण् ii) ञ iii) ङ.

ख) 'शिव' इति पदे 'श' वर्णस्य उच्चारणस्थानम् किम् ?

i) तालुः ii) मूर्धा iii) दन्ताः

**प्र.6** **अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य सन्धिं विच्छेदं वा कुरूत -** **(1×3=3)**

क) उत्तिष्ठ पुत्र ! सूर्योदयः अभवत् ।

ख) अहम् प्रतिदिनम् शिव + आलयम् गच्छामि ।

ग) अद्य + एव मरणमस्तु युगान्तरे वा ।

**प्र.7** **अधोलिखितेषु शब्दुरूपेषु उचितरूपैः रिक्तस्थानानि पूरयत -** **(1×3=3)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा - | अजः | अजौ | ........(1)........ |
| द्वितीया - | रामम् | रामौ | रामान् |
| तृतीया - | रामेण | रामाभ्याम् | ........(2)........ |
| चतुर्थी - | लतायै | ........(3)........ | लताभ्यः |
| पंचमी - | कवेः | कविभ्याम् | कविभ्यः |

**प्र.8** **निर्देशानुसारं धातुरूपाणि लिखत -** **(1×3=3)**

क) 'नम्' धातोः लट्लकारे प्रथमपुरूषस्य एकवचने किम् रूपं भवति ?

ख) 'गम्' धातोः लृट्लकारे मध्यमपुरूषस्य द्विवचने किम् रूपं भवति ?

ग) 'खाद्' धातोः लङ्.लकारे प्रथमपुरूषस्य बहुवचने किम् रूपं भवति ?

**प्र.9** **अधोप्रदत्ताः घटिकाः दृष्ट्वा उचितं पदं चित्वा च समयं लिखत ।** **(1×4=4)**

क) 

3:00

अ) द्वादशवादनम् ब) त्रिवादनम् स) सपादत्रिवादनम्

ख) 

7:30

अ) सपादसप्तवादनम् ब) पादोनाष्टवादनम् स) सार्धसप्तवादनम्

ग) 

1:00

अ) एकवादनम् ब) द्वादशवादनम् स) सपादएकवादनम्

घ) 

6:45

अ) सार्धसप्तवादनम् ब) पादोनसप्तवादनम् स) सपादएकवादनम्

## खण्डः - घ (पठितावबोधनम् - 40 अंकाः)

**प्र.10 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

एकदा श्रीकण्ठः तेन सह प्रातः नववादने तस्य गृहम् अगच्छत्। तत्र कृष्णमूर्तिः तस्य माता पिता च स्वशक्त्या श्रीकण्ठस्य आतिथ्यम् अकुर्वन्। एतत् दृष्ट्वा श्रीकण्ठः अकथयत् - ''मित्र ! अहं भवतां सत्कारेण सन्तुष्टोऽस्मि । केवलम् इदमेव मम दुःखं यत् तव गृहे एकोऽपि भृत्यः नास्ति। मम सत्काराय भवतां बहु कष्टं जातम् । मम गृहे तु बहवः कर्मकराः सन्ति ।''

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) श्रीकण्ठः कृष्णमूर्तेः गृहे कदा (कतिवादने) अगच्छत् ?

ब) श्रीकण्ठस्य मित्रस्य नाम किम् ?

**ख) पूर्णवाक्येन उत्तरत -** **(1)**

अ) श्रीकण्ठस्य आतिथ्यं के अकुर्वन ?

**ग) निर्देशानुसारं उत्तरत -** **(1×2=2)**

अ) 'सुखम्' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

i) दुःखम् ii) भवतां iii) जातम्

ब) 'एतत् दृष्ट्वा श्रीकण्ठः अकथयत् ।' अत्र क्रियापदं किम् ?

i) एतत् ii) श्रीकण्ठः iii) अकथयत्

**प्र.11 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।

मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) कुत्र रत्नानि सन्ति ?

ब) कति रत्नानि सन्ति ?

**ख) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ?

**ग) निर्देशानुसारं उत्तरत -** **(½×2=1)**

अ) अत्र श्लोके क्रियापदं किम् अस्ति ?

i) त्रीणि ii) विधीयते iii) गच्छति

ब) 'मूढैः' अत्र का विभक्तिः अस्ति ?

i) तृतीया ii) पंचमी iii) सप्तमी

**प्र.12 अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **(2×5=10)**

क) पृथिवी केन धार्यते ?

ख) कूर्मस्य किम् नाम आसीत् ?

ग) के कोलाहलं कुर्वन्ति ?

घ) 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां का विभूषिता ?

ड.) केन सह कलहं कृत्वा नरः सुखी न भवति ?

**प्र.13 रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×4=4)**

क) मृत्युः न प्रतीक्षते।

ख) रमायाः पिता समाजस्य प्रतारणाम् असहत् ।

ग) व्यवहारे मृदुता श्रेयसी ।

घ) वटुः शिवस्य निन्दां करोति ।

**प्र.14 अधोलिखितानां पदानां विभक्तिं वचनं च लिखत -** **(1×4=4)**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| क) | पिता | .................. | .................. |
| ख) | मनोरमया | .................. | .................. |
| ग) | नारीणाम् | .................. | .................. |
| घ) | रत्नानि | .................. | .................. |

**प्र.15 मञ्जूषातः पदं चित्वा रिक्तस्थानानि पूरयत -** **(1×4=4)**

**मञ्जूषा -** द्वादश, उड्डीयते, सदा, भक्षयिष्यामः

क) हंसाभ्याम् सह कूमोऽपि ......................... ।

ख) वयं गृहं नीत्वा कूर्मं .........................

ग) मासाः ......................... भवन्ति ।

घ) भक्तः ......................... ईश्वरं स्मरति ।

**प्र.16 मंजूषातः समानार्थकपदानि चित्वा समक्षं लिखत -** **(1×4=4)**

| | पदम् | समानार्थकम् पदम् |
|---|---|---|
| क) | कुशलाः | ............................ |
| ख) | देहस्य | ............................ |
| ग) | पशवः | ............................ |
| घ) | शिलायाम् | ............................ |

**मञ्जूषा -** शरीरस्य, प्रस्तरे, जन्तवः, दक्षाः

**प्र.17 अधोलिखितानां हिन्दीवाक्यानां संस्कृतेन अनुवादं कुरूत ।** **(1×4=4)**

क) बालक पुस्तक पढ़ता है ।

ख) वह पत्र लिखता है ।

ग) मैं विद्यालय जाता हूँ ।

घ) राधा दौड़ती है।